# संस्कृत-वार्ता:

दिनाङ्क :.26.12.2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा नरेन्द्रमोदिना जेन- ज़ी अथ जेन अल्फा इत्येतेषां किशोरवयबालानां देशः विकसितराष्ट्रस्य लक्ष्यम् अन्विष्यतीति उक्तम्।

· राष्ट्रपतिः द्रौपदी मुर्मुः, वीर-बाल-दिवसस्यावसरे 'प्रधानमन्त्री-राष्ट्रिय-बाल-पुरस्कारः' अयच्छत्; एते पुरस्काराः प्रापकान् प्रोत्साहयिष्यन्ति, समग्रस्य देशस्य बालानपि प्रेरयिष्यन्तीति उक्तवती च।

· विदेशमन्त्रालयः अकथयत् यत्, एच्-1बी-वीजा प्रतिबन्धनेन उत्पन्नानि विघ्नानि परिहर्तुं भारतम् अमेरिकादेशेन सह सक्रियतया संलग्नमस्तीति।

· कृषिकार्येण सह कृषकाणां कल्याणमन्त्री शिवराज सिंहचौहानेन विकसितभारत जी.राम जी. योजनान्तर्गतं सुनिश्चितं वृत्तिनियोजनं सपादशतदिनानि यावत् वर्धितम् इति दृढीकृतम्।

· महिला-क्रिकेट्-क्रीडायां, भारत-श्रीलङ्का-देशयोर्मध्ये तृतीया टी-20 इति अन्ताराष्ट्रिय-क्रीडा अद्य सायङ्काले तिरुवनन्तपुरम्-नगरे भविष्यति।

<u>प्रधानमन्त्री नरेन्द्रमोदी</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, यूनः राष्ट्रनिर्माणाय केन्द्रे स्थापयित्वा, नूतना: नीतयः निर्मीयन्ते इति। अद्य नवदिल्ल्याः भारतमण्डपम् इत्यत्र वीर-बाल-दिवस-कार्यक्रमम् अभिसंबोधयन् श्रीमोदी अवदत् यत्, जेन्-जी तथा जेन्-अल्फा इत्येतौ देशम् विकसितराष्ट्रं निर्मातुं लक्ष्यम् अन्विष्यन्ति। सः अवधानं दत्तवान् यत्, अन्तरिक्षं, क्रीडा, फिन्टेक्, विनिर्माणम् इत्यादिषु विविधक्षेत्रेषु सर्वकारेण स्वीकृतानां प्रत्येकम् उपक्रमाणां केन्द्रे युवानः एव तिष्ठन्ति। श्रीमोदी अवदत् यत् तेषां प्रतिभायाः, आत्मविश्वासस्य, नेतृत्वस्य च उपयोगाय उत्तमान् अवसरान् प्रदातुं सर्वकारः प्रतिबद्धः अस्ति इति। साहिबजादे बाबा ज़ोरावर् सिङ्घस्य, बाबा फ़तेह् सिङ्घस्य च अनुकरणीयस्य साहसस्य त्यागस्य च स्मरणम् अद्य देशे

भवति। श्रीमोदी अवदत् यत्, विगतचतुर्वर्षेषु वीर-बाल-दिवसस्य माध्यमेन साहिबज़ादानाम् प्रेरणाः बलिदानं  च यूनः प्रति प्रसारितम्।

## प्रधानमन्त्री-लेख:

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् तस्य सर्वकारः जीवनस्य सुगमतां वर्धयितुं प्रतिबद्धः अस्ति, आगामिषु कालेषु च परिष्कारस्य मार्गः इतोऽपि उत्साहेन प्रवर्तते।  सामाजिकान्तर्जालीये पटले ' माय गोव-इण्डिया' इत्यत्र एकं लेखं विनिमयी-कुर्वन्, श्रीमोदिना उक्तं यत् पञ्चविंशत्यधिक-द्विसहस्रतमवर्षः कथं शासनक्षेत्रे स्पष्टपरिवर्तनस्य प्रतीकः अस्ति, यस्मिन् परिष्कारः परिणामेषु केन्द्रितः अस्ति, न तु जटिलतायाम्।  सः अधोरेखितवान् यत् सरल-कर-विधिः,द्रुततर-विवाद-निवारणं,आधुनिक-श्रम-संहिता, अपराधमुक्त-अनुपालनेन नागरिकेभ्यः व्यवसायेभ्यः च समाह्वानानि न्यूनीकृतानि।  प्रधानमन्त्री अवदत् यत् तस्य सर्वकारस्य विश्वासः, पूर्वानुमेयता, दीर्घकालिकवृद्धिः च महत्त्वपूर्णाः सन्ति इति, सम्यक् परिकल्पिता नीतिः निश्शब्दतया दैनन्दिनजीवनं कथं परिष्कारयितुं शक्नोति इति दर्शयति।

## मुख्यसचिवाणां पञ्चमं राष्ट्रिय-सम्मेलनम्

अद्य नवदेहली-नगरे मुख्यसचिवानाम् पञ्चमं राष्ट्रिय-सम्मेलनम् आरभत।  प्रधानमन्त्रिणा नरेन्द्रमोदिना श्वः अस्य मासस्य अष्टाविंशति दिनाङ्के च सम्मेलनस्य अध्यक्षता करिष्यते। त्रिदिवसीय-सम्मेलनस्य उद्देश्यं राष्ट्रियप्राथमिकतासु संरचितेन सुस्थिरेण च संवादेन केन्द्र-राज्यसहभागित्वं सुदृढं करणीयम् अस्ति। प्रधानमन्त्रिणः सहकारीसङ्घ-वादस्य दृष्ट्या स्थापितं अयं सम्मेलनं केन्द्र-राज्ययोः सहयोगस्य मञ्चरूपेण कार्यं करोति।

## राष्ट्रपतिः बाल पुरस्कारः

अद्य नवदेहल्यां वीरबालदिवसा-वसरे राष्ट्रपतिपदासीना द्रौपदी मुर्मुः उत्कृष्ट-योग्यता युतेभ्यः बालेभ्यः बालाभ्यश्च "प्रधानमन्त्री राष्ट्रियबालपुरस्कारान्"  प्रदत्तवती।  अस्मिन् वर्षे 18 राज्यानां केन्द्रशासितप्रदेशानाञ्च 20 बालाः  पुरस्कृताः सन्ति।  अस्मिन् अवसरे राष्ट्रपतिः

अवदत् यत् एते पुरस्काराः प्रापकान् प्रोत्साहयिष्यन्ति, अन्यान् बालानपि प्रेरयिष्यन्ति च। राष्ट्रपतिः मुर्मुः अवदत् यत् पुरस्कारविजेतारः बालाः शौर्यक्षेत्रे, कला-संस्कृतिक्षेत्रे, पर्यावरणक्षेत्रे, नवान्वेषणक्षेत्रे, विज्ञान-तन्त्रज्ञानक्षेत्रे च असाधारणं योगदानं दत्तवन्तः इति।

राष्ट्रपतिः अवदत् यत् अयं दिवसः प्रतिवर्षं साहिबज़ादा बाबा ज़ोरावर् सिङ्घ् वर्यस्य, बाबा फ़तेह् सिङ्घ् वर्यस्य च बलिदानानां स्मरणार्थं आचर्यते, ययोः अतुल्यः त्यागः सर्वान् प्रेरयति एतौ श्रीगुरुगोविन्दसिङ्घ् वर्यस्य पुत्रौ आस्ताम्। राष्ट्रपतिः इत्यपि अकथयत् यत् यदा देशस्य बालकाः देशभक्तिना उच्च आदर्शैश्च प्रेरिताः भवन्ति तदा तस्य राष्ट्रस्य मानवता निश्चिता भवति।

तस्याः भाषणे राष्ट्रपतिः केचन पुरस्कारविजेतृणां बालकानां असाधारण-उपलब्धीः उद्घाटितवती। आकाशवाण्याः कतिपयैः पुरस्कृतबालैः वार्तालापम् कृतम्। कर्णाटकस्य 15 वर्षीया तरणवीरा धीनिधि देसिङ्गु उक्तवती यत्, सा राष्ट्रपतिना बालपुरस्कारं प्राप्य सम्मानिता अनुभवतीति।

## एच्-1बी-वीजा

एच्-1बी-वीजा धारकाणां भारतीयनागरिकाणाम् पुरत: उत्पन्नान् विघ्नान् परिहर्तुं न्यूनीकर्तुं च भारतदेश: अमेरिकादेशेन सह सक्रियतया चर्चायै संलग्नः अस्ति। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत्, अमेरिकादेशस्य वीजा-नियुक्त्यै, समयनिर्धारणाय, पुनर्निर्धारणाय वा विलम्बं, कष्टानि च सम्मुखीकृताः भारतीय-नागरिकाः सर्वकाराय बहुवारम् अभ्यावेदनानि प्रदत्तवन्तः। सः अवदत् यत् भारतेन नवदिल्ल्यां वाशिङ्गटन-डी. सी.-नगरे च अमेरिकादेशस्य उच्चाधिकारिणां समक्षं एताः चिन्ताः उत्थापिताः सन्तीति।

## शिवराज-विकसित भारत जी राम जी

केन्द्रीयग्रामीणविकासमन्त्री शिवराज् सिङ्घ् चौहान् वर्यः अवदत् यत् विकसितभारत जी.राम जी. योजनान्तर्गतं स्वतन्त्रतायाः शताब्दवर्षपर्यन्तं विकसितभारतस्य सङ्कल्पं साकारं कर्तुं ग्रामेषु विकासकार्याणि सम्पाद्यन्ते इति। डी. डी. न्यूज इत्यनेन सह वार्तालापं कुर्वन्, श्री चौहानः अवदत् यत् इयं योजना प्रतिग्रामीणपरिवारस्य वैधानिक-वृत्यवसर-प्रत्याभूतिं शत- दिवसात् सपादशत- दिनानि यावत् वर्धयतीति। मन्त्री अवधानं दत्तवान् यत् नव-अधिनियमितः विकसित भारत जी. राम जी. अधिनियमानुसारं, यदि आवेदनस्य पञ्चदश- दिवसेषु कार्यस्य व्यवस्था न भवति तर्हि अनिवार्यतया निरुद्योग-भत्ता इति देयराशिः प्रदास्यते इति।

श्रीचौहानः अवदत् यत्, अस्य केन्द्रीयभागः पञ्चनवति- सहस्रकोटिरूप्यकाणि अस्तीति।

## शाह-उधमसिंहः

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य नवदेहल्यां राष्ट्रिय-अन्वेषण-संस्थया आयोजिते आतंक-निरोध-सम्मेलनस्य उद्घाटनम् अकरोत्। अस्मिन् अवसरे, श्रीशाहः एन्. आई. ए इत्यस्य कार्मिकान् आतंक-प्रतिरोध-उपायेषु तेषां योगदानाय सम्मानयत्। सामाजिक-प्रसार-माध्यमे, श्रीशाहः अधोरेखितवान् यत् भयोत्पादनं मानवानां बृहत्तमः शत्रुः अस्ति, अतः अस्माभिः सर्वैः मिलित्वा इमं विरुध्य युद्धं कर्तव्यमिति। सः अवदत् यत् नरेन्द्रमोदी-सर्वकारः देशे भयोत्पादनं निर्दयिरूपेण नियन्त्रयतीति।

## अमितशाहसन्थालीभाषा

केन्द्रीयगृहमन्त्रिणा अमितशाहेन अद्य सन्थालीभाषायां प्रकाशितस्य संविधानस्य विषये हर्षं प्रकटितम्। सामाजिकान्तर्जालीये सन्देशे श्रीशाहः उक्तवान् यत् एतत् कार्यं सन्थाली-समुदायस्य अपि च सम्पूर्णस्य देशस्य कृते गौरवस्य विषयः अस्ति। मन्त्रिणा उक्तं यत् ओल-चिकी-लिप्यां संविधानस्य प्रकाशनेन आदिवासि-समाजं प्रति आदर्शं मूल्यं च प्राप्स्यते। सः अवदत् यत् एतत् संविधाननिर्मातॄणां स्वप्नं पूरयिष्यति इति।

## बी. एन्.पी. रहमानः

बाङ्ग्लादेश्-नेषनलिस्ट्-पार्टी इत्यस्य कार्यवाहक-अध्यक्षः तारिक-रहमानः उक्तवान् यत् देशः मुस्लिम्-हिन्दू-बौद्ध-क्रिश्चियन- सर्वमतानुयायिनां जनानां अस्तीति। सः सर्वसमावेशकसमाजस्य दृष्टिं प्रस्तूय, शान्तिं स्थापयितुं जनान् प्रार्थयत्। सप्तदश- वर्षाणाम् अनन्तरं ढाका-नगरं आगत्य रहमानः अवदत् यत्, अस्माभिः सर्वैः मिलित्वा देशस्य निर्माण कर्तव्यमिति समयः आगतः। सः अवदत् यत् अयं देशः पर्वतानां समतलप्रदेशानां च जनानां, मुस्लिम्-जनानां, हिन्दूनां, बौद्धानां, क्रिश्चियन्-जनानां च अस्तीति तेनोक्तम्।

## गुजरात-भूकम्पः

अद्य प्रातःकाले गुजरातस्य कच्छ-जनपदस्य वागड-प्रदेशे क्रमानुगत-अष्टभूकम्पानां प्रकम्पनं जातम्। प्रातः 4:30 वादने वागड-क्षेत्रे 4.6 तीव्रतायां भूकम्पः अनुभूतः। तदनन्तरं शयनं कुर्वन्तः जनाः स्वगृहात् बहिः आगताः। भूकम्पस्य केन्द्रबिन्दुः रापर-नगरात् पश्चिम-वायव्यदिशि 22 किलोमीटरपरिमितौ दूरे अभिलिखितः।

## महिला-क्रिकेट्-क्रीडा

महिला-क्रिकेट्-क्रीडायां, भारत-श्रीलङ्का-देशयोः मध्ये तृतीया-विंशति-प्रति-विंशति अन्ताराष्ट्रिय-क्रीडा अद्य तिरुवनंतपुरं-नगरस्य ग्रीन्फील्ड्-अन्ताराष्ट्रिय-क्रीडाङ्गणे सायं सप्तवादने भविष्यति।